শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী ৱরাহাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী ৱরাহাষ্টকম্ ॥

কমলাযতনেত্রায কমলাযতনোরসে।
ৱরাহৱপুষে দৈত্যৱরাহৱপুষে নমঃ॥ **1** ॥

ৱামাংসভূষাযিতৱিশ্ৱধাত্রী -
ৱামস্তনন্যস্তকরারৱিন্দঃ।
জিঘ্রন্ মুখেনাপি কপোলমেনাং
জীৱাতুরস্মাকগুরোঃ স জীযাৎ॥ **2** ॥

ৱেদিস্তনূৱাহৱনীযমাস্যং
বর্হীংষি লোমানি জুহূশ্চ নাসা।
শম্যা চ দংষ্ট্রাজনি যস্য যূপো
ৱালো মখাত্মা স পুনাতু পোত্রী॥ **3** ॥

পাপেন দৈন্যেন ভৱাম্বুরাশৌ
নিপাতিতং মাং নিরৱগ্রহোর্মৌ।
ধৃতারিরুদ্ধৃত্য ধরামিৱোচ্চৈঃ
কুর্যান্মুদং মে কুহনাৱরাহঃ॥ **4** ॥

ৱেশন্ততি ব্রতজুষাং হৃদযং মুনীনাং
ৱেগাপগাৱিহৃতিকাননচঙ্ক্রমাণাম্।
মুস্তাগণন্তি কিল যস্য সুরারিৱর্গাঃ
কোলঃ স কোঽপি কুশলং কুরুতাদজস্রম্॥ **5** ॥

কল্যাণমঙ্কুরতি যস্য কটাক্ষলেশা -
    দ্যস্য প্রিযা ৱসুমতী সৱনং যদঙ্গম্।
অস্মদ্গুরোঃ কুলধনং চরণৌ যদীযৌ
    ভূযঃ শুভং দিশতু ভূমিৱরাহ এষঃ॥ **6**॥

কল্পান্তসন্ততঘনাঘননির্ৱিঘাত -
    নির্ঘাতৱাতরৱনিষ্ঠুরতারধীরম্।
মাযাকিটের্ৱধিরিতদ্রুহিণশ্রৱস্কং
    ঘোণাপুটীঘুরঘুরারসিতং পুনাতু॥ **7**॥

ঝটিতি ৱিলুঠদুর্ৱীচাটুৱাচাটসিন্ধু -
    স্ফুটপটহৱিদস্রস্ফোটদীপ্তোটমুদ্যম্।
খরখুরপুটঘাতাধূতখাটারিৱাটঃ
    কপটকিটিরঘৌঘাটোপমুচ্চাটযেন্নঃ॥ **8**॥

যৎকারিকাদর্পণাখ্যকৃতিনাৱা ভৱাম্বুধিম্।
সন্তস্তরন্তি ৱরদগুরৱে শ্রীমতে নমঃ॥ **9**॥

॥ ইতি শ্রী ৱরাহাষ্টকং সমাপ্তম্॥